## CBSE Test Paper 01

## Ch-10 प्राणेभ्योऽपि प्रियः सुहृत्

1. **अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत।**

   सुलभेष्वर्थलाभेषु परसंवेदने जने।
   क इदं दुष्करं कुर्यादिदानीं शिविना विना।।

   I. **एकपदेन उत्तरत-**
      i. परसंवेदने किं भवति?
      ii. अर्थलाभः कीदृशो भवति?
   II. **पूर्णवाक्येन उत्तरत-**
      i. इदं दुष्कर कार्य कः कर्तुम् शक्नोति?
   III. **भाषिककार्यम्-**
      i. 'इदम् दुष्करम्' अत्र विशेषणपदं किम्?
         (क) इदम्
         (ख) दुष्करम्
         (ग) इदमदुष्करम्
         (घ) जने
      ii. 'क इदं दुष्करं कुर्यात्'। अत्र क्रियापदं किं वर्तते?
         (क) कः
         (ख) क
         (ग) दुष्करं
         (घ) कुर्यात्
      iii. श्लोके 'दुर्लभेषु' इत्यस्य पदस्य कः विपर्ययः आगतः?
         (क) सुलभेषु
         (ख) सुलभेष्वर्य
         (ग) लाभेषु
         (घ) सुलभः

2. **स्थूलपदमाधृत्य प्रश्ननिर्माणं कुरुत-**

   i. आर्यस्य **प्रसादेन** मे वाणिज्या अखण्डिता।
   ii. प्रीताभ्यः प्रकृतिभ्यः **राजानः** प्रतिप्रियमिच्छन्ति।
   iii. तृणानाम् **अग्निना** सह विरोधो भवति।

iv. प्राणेभ्योऽपि **प्रियः** सुहृत्।

3. **अधोलिखितानि वाक्यानि घटनाक्रमानुसारेण योजयत-**

   i. शिष्यः चन्दनदासेन सह प्रविशति।
   ii. चाणक्य तस्य स्वागतं करोति।
   iii. चाणक्य चन्दनदासम् द्रष्टुम् इच्छति।
   iv. अत्यादरः शङ्कनीयः भवति।
   v. प्रीताभ्यः प्रकृतिभ्यः प्रीतिप्रियम् इच्छन्ति राजानः।
   vi. चन्दनदासः चाणक्यम् प्रणमति।
   vii. आर्यस्य प्रसादेन तस्य वाणिज्या अखण्डिता अस्ति।
   viii. चन्दनदासः अनुगृहीतः भवति।

4. **अधोलिखित श्लोकानाम् भावर्थम् मञ्जूषायाः सहायतया उचित-क्रमेण पूरयत्।**

   सुलभेष्वर्थलाभेषु परसंवेदने जने।
   क इदं दुष्करं कुर्यादिदानीं शिविना विना।।

   **भावार्थः-** परकीयस्य वस्तुनः (i)________ कृते सति अर्थलाभे सुलभे सत्यपि स्वार्थं (ii)_________ परेषां संरक्षणरूपं दुष्करं कर्म अस्मिन् (iii)__________ महाराजं (iv)_________ बिना कः करिष्यति?

| **मञ्जूषा-** संसारे, परित्यज्य, शिविं, समर्पणे |
|---|

## CBSE Test Paper 01

## Ch-10 प्राणेभ्योऽपि प्रियः सुहृत्

## Answer

1. I. (i) अर्थलाभः
      (ii) सुलभः
   II. (i) शिविना विना अर्थात् चन्दनदासेन विना इदं दुष्करं कार्य कोऽपि न कर्तुम् शक्नोति।
   III. (i) (ख) दुष्करम्
      (ii) (घ) कुर्यात्
      (iii) (क) सुलभेषु

2. i. केन, ii. के, iii. केन, iv. कीदृशः

3. i. चाणक्य चन्दनदासम् द्रष्टुम् इच्छति।
   ii. शिष्यः चन्दनदासेन सह प्रविशति।
   iii. चन्दनदासः चाणक्यम् प्रणमति।
   iv. चाणक्य तस्य स्वागतम् करोति।
   v. अत्यादरः शङ्कनीयः भवति।
   vi. आर्यस्य प्रसादेन तस्य वाणिज्या अखण्डिता अस्ति।
   vii. प्रीताभ्यः प्रकृतिभ्यः प्रीतिप्रियम् इच्छन्ति राजानः।
   viii. चन्दनदासः अनुगृहीतः भवति।

4. i. समर्पणे, ii. परित्यज्य, iii. संसारे, iv. शिविं